पक्षे न सन्ति, नित्यत्वाच्च नित्यं द्रव्यम् अनित्या गुणा यथा कल्पादिप्रविभागः, सएव सम्पन्नरसगन्धो व्यापन्नरसगन्धो वा भवतीति" सुश्रुतम् अतएव "सत्वे निविशतेऽपैति पृथग्जातिषु दृश्यते। आधेयश्चाक्रियाजश्च सोऽसत्वप्रकृतिर्गुणः" इति गुणलक्षणे गुणानामुत्पाद-विनाशोक्तिः। सदातनभिन्ने काले च। "अनित्यं हि स्थितिर्यस्मात्तस्मादतिथिरुच्यते" इति मनुः। अनित्यमित्यत्र व्याप्तौ, कालाधिकरणे वा द्वितीया न मान्ताव्ययत्वमस्य तथात्वे प्रमाणाभावात्। सदाकालवृत्तिपरत्वेऽपि धात्वर्थस्याव्ययसाध्य-क्रियाविशेषणत्वेन सञ्चारोरतिमन्दिरावधीत्यादिवत् द्वितीयेति बोध्यम्। नित्यम् मान्तमव्ययम् न०त०। केचित्।

**अनिद्रा** स्त्री न निद्रा अभावार्थे न०त०। निद्राभावे "हृद्ग्रह-लौल्यमनिद्रा स्तम्भ" इति सुश्रुतम्। निद्राराहित्ये च रोगविशेष एव कारणम्। नास्ति निद्रा यस्य। निद्रारहिते आलस्यरहिते त्रि० "अनिद्रौ षड़होरात्रं तपोवनमरक्षतामिति "प्रजा नित्यमनिद्रेण यथाशक्त्यभिरक्षिता" इति च रामा०। "अनिद्रेण अनलसेनेति" तदर्थः।

**अनिन्दित** त्रि० न निन्दितः। निन्दारहिते प्रशस्ते "अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजेति" मनुः।

**अनिन्द्र** त्रि० न इन्द्रोयाज्योयस्य। इन्द्रोपासनाशून्ये "मामनिन्द्राः कृणवन्ननुक्थाः" ऋ० ५,२,३, "अनिन्द्रा इन्द्रमयजन्त" इति भाष्यम्।

**अनिबद्ध** त्रि० न निबद्धः। अनायत्ते, "अनायतो अनिबद्ध" इति ऋ० ४,१३,५। ग्रथितभिन्ने च।

**अनिबाध** त्रि० नास्ति निबाधः संबाधा यस्य। संबाधरहिते "उरौ महाँ अनिबाधे ववर्द्ध" इति ऋ० ३,१,११, अनिबाधे असंबाधे इति भा०।

**अनिभृत** त्रि० न निभृतः न०त०। चञ्चले "भुवमनिभृत-वेलेति" भा०। "वेलाचञ्चला" इति मल्लि०।

**अनिभृष्ट** त्रि० नि+धृष क्त नि० न०त०। अबाधिते। अनिभृष्टतविषिर्हन्योजसा "ऋ०२,२५,४, अनिभृष्टतविषिः अबाधितबल" इति भा०।

**अनिमक** पु० अन–जीवने शब्दे च भावे बा० इमन् "अनिमः जीवनं तेन कायति प्रकाशते कै–क। भेके। तस्य मरणेऽपि पुनरुज्जीवनात्तथात्वम्। कोकिले, भ्रमरे च तयोः मधुरशब्देन प्रकाशमानत्वात्तथात्वम्। अनिमाय जीवनाय कं जलं यस्य। पद्मकेशरे। अनिमाय कं सुखं यस्मात्। मधूके (मौल) वृक्षे मेदिनिः।

**अनिमान** त्रि० नि+मा–भावे ल्युट् न०ब०। परिच्छेद-रहिते "स नो महाँ अनिमानो धूमकेतुः" ऋ०१,२७,११ "अनिमानः अपरिच्छिन्न" इति भा०।

**अनिमित्त** न० न निमित्तम्। निमित्ताभावे कारणाभावे "अनातुरः खानि खानि न स्पृशेदनिमित्ततः" इति मनुः न०ब०। कारणशून्ये त्रि०।

**अनिमिष** त्रि० नि+मिष–भावे क्विप् स नास्ति यत्र। स्पन्दशून्ये दर्शने "इमे दिवो अनिमिषा" इति ऋ०७, ६०,७, "मित्रः कृष्टीरनिमिषा" इति ऋ०३,५९,१, अनिमिषा निमिषरहितेनेति भा०।

**अनिमि(मे)ष** पु० नास्ति निमि(मे)षः चक्षुःस्पन्दनं यस्य मिष घञ् कुटादि० न गुणः, मिष–ण्वादि घञ्–वा,। चक्षुःस्पन्दनशून्ये देवे "सुरेषु नापश्यदवेक्षताक्ष्णोर्द्वयमे निमेषं निजसम्मुखे सेति" नैषधे सुराणां निमेषशून्यत्वमुक्तम् "अस्वप्नजो अनिमिषा" इति २,२७,९. संक्रन्दनो अनिमिष एकवीर इति च ऋ० १०,१०३,१। मत्स्ये च। निमिषो दृष्टिप्रतिबन्धस्तच्छून्ये विष्णौ च। "नैमिषोऽनिमिषस्रग्वी" इति भाग० "अनिमिषः विष्णुः अलुप्तदृष्टित्वात् तस्य क्षेत्रे इति श्रीधरः। न निमिषति चलतीति नि+मिष –क न०त०। महाकाले। क्रियाशून्ये वस्तुमात्रे त्रि०। स्पन्दनशून्ये त्रि०। "सतैस्तमक्ष्णामनिमेषवृत्तिभिरिति" रघुः।

**अनियत** त्रि० न नियतः। नियमेनैकरूपशून्ये, अनित्ये अस्थायिनि "रत्यादयोऽप्यनियते रसे स्युर्व्यभिचारिणः" इति सा०द०। नियतकारणाद्यनपेक्षे च "द्विष्टं त्रिविधं सुनयोनियतमनियतं योगजञ्चेति" ज्योति०। अनियन्त्रिते च। [उच्छृङ्खले च।

**अनियन्त्रित** त्रि० नि+यन्त्र चु० क्त न०त०। अनियमिते

**अनियम** पु० न नियमः अभावार्थे न०त०। नियमाभावे। "पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः। षष्ठे पादे गुरु ज्ञेयं शेषेष्वनियमोमत" इति छन्दो०।

**अनिरा** स्त्री नास्ति इरा अन्नं यस्याः ५ब०। अतिवृष्ट्यादौ ईतौ। "व्यस्यन् विश्वा अनिरा" इति यजु० ११,४७, अनिराः अतिवृष्ट्याद्या इति वेददीपः। न ईरयितुं शक्यते ईर–क पु० ह्रस्वः न०त०। प्रेरयितुमशक्ये। "अपत्या अस्युरनिरा" इति ऋ० ८,४८,११, "अनिरा प्रेरयितुमशक्या" इति भा०। ६ब०। अन्नरहिते दारिद्र्ये च "युयुतमस्मदनिरामसीवामिति" ऋ०७,७१,२, "अनिरामन्नदारिद्र्यमिति" भा०।